## परस्मिन् विभाषा। (१३८/२७०६)

भविष्यति मर्यादावचने कालविभागे चानहोरात्राणाम् इति [1]सर्वमनुवर्तते। कालमर्यादाविभागे सति भविष्यति काले परस्मिन् प्रविभागे विभाषा अनद्यतनवत् प्रत्ययविधिर्न भवति, न चेदहोरात्रसम्बन्धी प्रविभागः। [2]अवरस्मिन्वर्जं पूर्वमनुवर्तते। अवरस्मिन् पूर्वेण प्रतिषेध उक्तः, सम्प्रति परस्मिन्नप्राप्त एव विकल्प उच्यते। योऽयं संवत्सर आगामी, तस्य यत् परमाग्रहायण्याः तत्र युक्ता अध्येष्यामहे, [3]अध्येतास्महे, तत्र सक्तून् पास्यामः, तत्र सक्तून् पातास्मः। अनहोरात्राणाम् [4]इत्येव। योऽयं त्रिंशद्रात्र आगामी, तस्य यः परः पञ्चदशरात्रः, तत्र युक्ता अध्येतास्महे, तत्र सक्तून् पातास्मः। भविष्यति इत्येव। योऽयं संवत्सरोऽतीतः, तस्य यत् परमाग्रहायण्याः, तत्र युक्ता अध्यैमहि, तत्रौदनमभुञ्ज्महि। मर्यादावचने इत्येव। योऽयं [5]संवत्सरो निरवधिकः काल आगामी, तस्य यत् परमाग्रहायण्याः, तत्र युक्ता अध्येतास्महे, तत्र सक्तून् पातास्मः[6]। कालविभागे इत्येव। योऽयमध्वा गन्तव्य आपाटलिपुत्रात्, तस्य यत् परं कौशाम्ब्याः, [7]तत्र युक्ता अध्येतास्महे, ओदनं भोक्तास्महे। इति सर्वत्र अनद्यतनवत् प्रत्यया [8]उदाहार्याः॥

## लिङ्निमित्ते लृङ् क्रियातिपत्तौ। (१३९/२२२९)

भविष्यति [9]इत्यनुवर्तते। 'हेतुहेतुमतोर्लिङ' (३.३.१५६/२८१३) इत्येवमादिकं लिङो निमित्तम्। तत्र [10]लिङनिमित्ते भविष्यति काले लृङ प्रत्ययो भवति क्रियातिपत्तौ सत्याम्। कुतश्चिद्वैगुण्यादनभिनिर्वृत्तिः क्रियायाः क्रियातिपत्तिः। दक्षिणेन चेदायास्यन्न शकटं पर्याभविष्यत्। यदि कमलकमाह्वास्यन् न शकटं पर्याभविष्यत्। अभोक्ष्यत भवान् घृतेन यदि मत्समीपमा[11]गमिष्यत्। भविष्यत्कालविषयमेतद्वचनम्। भविष्यदपर्याभवनं [12]च हेतुमत्, तत्र हेतुभूतं च कमलकाह्वानम्। [13]लिङ्गिलिङ्गे बुद्ध्वा तदतिपत्तिं च प्रमाणान्तरादवगम्य वक्ता वाक्यं प्रयुङ्क्ते, यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यत् इति। हेतुहेतुमतोराह्वानापर्याभवनयोः भविष्य[14]त्कालविषययोः अतिपत्तिः इतो वाक्यादवगम्यते॥

## भूते च। (१४०/२७०७)

लिङनिमित्ते लृङ क्रियातिपत्तौ इति सर्वमनुवर्तते। पूर्वेण भविष्यति विहितः सम्प्रति भूते विधीयते। भूते [15]च काले लिङनिमित्ते क्रियातिपत्तौ सत्यां लृङ प्रत्ययो भवति। 'उताप्योः समर्थयोर्लिङ' (३.३.१५२/२८०९) [16]इत्यारभ्य लिङनिमित्तेषु विधानमेतत्। प्राक् ततो विकल्पं वक्ष्यति। दृष्टो मया भवत्पुत्रोऽन्नार्थी चङ्क्रम्यमाणः, अपरश्च [17]द्विजो ब्राह्मणार्थी, यदि स तेन [18]दृष्टोऽभविष्यत्, [19]तदा अभोक्ष्यत। न तु भुक्तवान्, अन्येन पथा स गतः॥

---

1. सर्वं नास्ति ह. 2. वाक्यमिदं नास्ति फ. ह. 3. तत्र युक्ता इत्यधिकम् फ. 4. इति किम् फ. 5. संवत्सरः नास्ति फ. 6. ओदनं भोक्तास्महे इत्यधिकम् ब. 7. तत्र नास्ति ह. 8. एव उदाहर्तव्याः फ. 9. इत्येव ब. ह. 10. लिङो निमित्ते फ. 11. आसिष्यत ब. फ. 12. च नास्ति अ. क. फ. ह. 13. लिङ्गेन ह. 14. कालयोः फ. 15. च नास्ति ह. 16. इत्यत आरभ्य ह. 17. द्विजो नास्ति फ. 18. दृश्येत चेत् ह. 19. उताहो फ, अपि ह.